ॐ श्री परमात्मने नमः। अथ अष्टादशोध्यायः। मोक्षसंन्यासयोगः।

| | |
|---|---|
| अर्जुन उवाच<br>संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।<br>त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥१॥ | न हि देहभृता शक्यम् त्यक्तुं कर्माण्यशेषतः।<br>यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥११॥ |
| श्री भगवानुवाच<br>काम्यानां कर्मणां न्यासम् संन्यासं कवयो विदुः।<br>सर्वकर्मफलत्यागम् प्राहुस्त्यागं विचक्षणाः॥२॥ | अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।<br>भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥१२॥ |
| त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।<br>यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥३॥ | पञ्चैतानि महाबाहो कारणानि निबोध मे।<br>साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥१३॥ |
| निश्चयं शृणु मे तत्र त्यागे भरतसत्तम।<br>त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः॥४॥ | अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।<br>विविधाश्च पृथक्चेष्टाः दैवं चैवात्र पञ्चमम्॥१४॥ |
| यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।<br>यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥५॥ | शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः।<br>न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥१५॥ |
| एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।<br>कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥६॥ | तत्रैवं सति कर्तारम् आत्मानं केवलं तु यः।<br>पश्यत्यकृतबुद्धित्वात् न स पश्यति दुर्मतिः॥१६॥ |
| नियतस्य तु संन्यासः कर्मणो नोपपद्यते।<br>मोहात्तस्य परित्यागः तामसः परिकीर्तितः॥७॥ | यस्य नाहङ्कृतो भावः बुद्धिर्यस्य न लिप्यते।<br>हत्वाऽपि स इमाँल्लोकान् न हन्ति न निबध्यते॥१७॥ |
| दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्।<br>स कृत्वा राजसं त्यागम् नैव त्यागफलं लभेत्॥८॥ | ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।<br>करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः॥१८॥ |
| कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।<br>सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥९॥ | ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः।<br>प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि॥१९॥ |
| न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।<br>त्यागी सत्त्वसमाविष्टः मेधावी छिन्नसंशयः॥१०॥ | सर्वभूतेषु येनैकम् भावमव्ययमीक्षते।<br>अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥२०॥ |

| | |
|---|---|
| पृथक्त्वेन तु यज्ज्ञानम् नानाभावान् पृथग्विधान्।<br>वेत्ति सर्वेषु भूतेषु तज्ज्ञानम् विद्धि राजसम्॥ २१॥ | यया धर्ममधर्मं च कार्यं चाकार्यमेव च।<br>अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी॥ ३१॥ |
| यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम्।<br>अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्॥ २२॥ | अधर्मं धर्ममिति या मन्यते तमसावृता।<br>सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥ ३२॥ |
| नियतं सङ्गरहितम् अरागद्वेषतः कृतम्।<br>अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते॥ २३॥ | धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः।<br>योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी॥ ३३॥ |
| यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः।<br>क्रियते बहुलायासम् तद्राजसमुदाहृतम्॥ २४॥ | यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन।<br>प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी॥ ३४॥ |
| अनुबन्धं क्षयं हिंसाम् अनपेक्ष्य च पौरुषम्।<br>मोहादारभ्यते कर्म यत्तत्तामसमुच्यते॥ २५॥ | यया स्वप्नं भयं शोकम् विषादं मदमेव च।<br>न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी॥ ३५॥ |
| मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।<br>सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥ २६॥ | सुखं त्विदानीं त्रिविधम् शृणु मे भरतर्षभ।<br>अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति॥ ३६॥ |
| रागी कर्मफलप्रेप्सुः लुब्धो हिंसात्मकोऽशुचिः।<br>हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः॥ २७॥ | यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।<br>तत्सुखं सात्त्विकं प्रोक्तम् आत्मबुद्धिप्रसादजम्॥ ३७॥ |
| अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।<br>विषादी दीर्घसूत्री च कर्ता तामस उच्यते॥ २८॥ | विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम्।<br>परिणामे विषमिव तत्सुखं राजसं स्मृतम्॥ ३८॥ |
| बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु।<br>प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय॥ २९॥ | यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।<br>निद्रालस्यप्रमादोत्थम् तत्तामसमुदाहृतम्॥ ३९॥ |
| प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।<br>बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥ ३०॥ | न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।<br>सत्त्वं प्रकृतिजैर्मुक्तम् यदेभिः स्यात्त्रिभिर्गुणैः॥ ४०॥ |

ॐ तत् सत्। श्रीकृष्णार्पणमस्तु॥

(अवशिष्टाः श्लोकाः आगामिनि वर्षे अनुवर्तिष्यन्ते।)